श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री वादिराजयति कृता

# ॥ श्री सहस्रारस्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री सहस्रारस्तुतिः ॥

सहस्रार महाशूर रणधीर गिरा स्तुतिम्।
षट्कोणरिपुहृद्बाण सन्त्राण करवाणि ते ॥ 1 ॥

यस्त्वत्तस्तप्तसुतनुः सोऽत्ति मुक्तिफलं किल।
नातप्ततनुरित्यस्तौत् ख्याता वाक् त्वां महौजस ॥ 2 ॥

हतवक्रद्विषच्चक्र हरिचक्र नमोऽस्तु ते।
प्रकृतिघ्नासतां विघ्न त्वमभग्नपराक्रम ॥ 3 ॥

कराग्रे भ्रमणं विष्णोर्यदा ते चक्र जायते।
तदा द्विधाऽपि भ्रमणं दृश्यतेऽन्तर्बहिर्द्विषाम् ॥ 4 ॥

वरादवध्यदैत्यौघशिरः खण्डनचातुरी।
हरेरायुध ते दृष्टा न दृष्टा या हरायुधे ॥ 5 ॥

अवार्यवीर्यस्य हरेः कार्येषु त्वं धुरन्धरः।
असाध्यसाधको राट् ते त्वं चासाध्यस्य साधकः ॥ 6 ॥

ये विघ्नकन्धराश्चक्र दैतेयास्तव धारया।
त एव चित्रमनयंस्तथाऽप्यच्छिन्नकन्धराम् ॥ 7 ॥

अरे तवाग्रे नृहरेररिः कोऽपि न जीवति।
नेमे तवाग्रे कामाद्या नेमे जीवन्त्वहो द्विषः ॥ 8 ॥

पवित्र पविवत् त्राहि पवित्रीकुरु चाश्रितान्।
चरण श्रीशचरणौ स्थिरीकुरु मनस्सु नः ॥ 9 ॥

यस्त्वं दुर्वाससः पृष्ठनिष्ठो दृष्टोऽखिलैः सुरैः।
अस्तावयः स्वभर्तारं सत्वं स्तावय मद्गिरा॥ **10**॥

भूस्थदुर्दर्शनं सर्वं धिक्कुरुष्व सुदर्शन।
वायोः सुदर्शनं सर्वस्यायोध्यं कुरु ते नमः॥ **11**॥

सुष्ठु दर्शय लक्ष्मीशतत्त्वं सूर्यायुतप्रभ।
द्वारं नः कुरु हर्याप्त्यै कृतद्वार त्वमस्यपि॥ **12**॥

पद्यानि निरवद्यानि वादिराजाभिधः सुधीः।
द्वादश द्वादशारस्य चक्रस्य स्तुतयेऽकृत॥ **13**॥

॥ श्री सहस्रारस्तुतिः समाप्ता॥